CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजराजेश्वरानन्दतीर्थ मुमुक्षु भवन वाराणसी

अथ

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

प्रारभ्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य च । संकल्पः।अद्य पूर्वोच्चारितैवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसि द्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्कर देवताप्रीत्यर्थं च रुद्रैकादशिन्यभिषेकयुक्तं सकृदावर्तनाभिषेकयु क्तं वा अमुकद्रव्येण रुद्राभिषेकमहं करिष्ये । तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघुषडङ्गन्यासाँश्च करिष्ये ॥ मनोजूतिरितिमन्त्रस्य बृहस्पतिर्ऋषिः। बृहती छन्दः। बृहस्पतिर्देवता । हृदयन्यासे जपे वि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नियोगः ॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो
त्वरिष्टं यज्ञं समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३
म्प्रतिष्ठ ॥ ॐ हृदयाय नमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधग
विष्ठिरा ऋषिः। त्रिष्टुप् छन्दः। अग्निर्देवता। शिरोन्यासे जपे विनियो
गः ॥ ॐ अबोद्ध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्।
यह्वाऽइवप्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ ॥ ॐ शिरसे
स्वाहा ॥ २ ॥ मूर्द्धानमितिमन्त्रस्य भरद्वाज ऋषिः। त्रिष्टुप् छन्दः।
अग्निर्देवता। शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म्पृथिव्याव्वैश्वानुरमृतऽआजातमुग्निम् ॥ कुविंᳫसुम्म्राजुमतिंथिञ्जनां नामासन्नापात्रंञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ मर्म्माणित इतिमन्त्रस्य अप्रातिरथ ऋषिः। विराट् छन्दः। मर्म्माणि देवता। कवच न्यासे जपे विनियोगः ॥ ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोमं स्त्वाराजामृतेनानुंवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयंन्तु न्त्वानुदेवामदन्तु ॥ ॐ कवचायहुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमन्त्र स्य विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छन्दः। विश्वकर्मा देवता। नेत्रन्या से जपे विनियोगः ॥ ॐ व्विश्वतंश्चक्षुरुतव्विश्वतोंमुखोव्विश्वतोंबाहुरु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. ताद्विश्वतंस्पपात् ॥ सम्बाहुभ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमीजनयंन्देव न्या.
१ ऽएकंः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोक इतिमन्त्रस्य परमेष्ठी
ऋषिः । जगती छन्दः । एकरुद्रो देवता । अस्त्रन्यासे जपे विनियोगः
॥ ॐ मानंस्तोकेतनंयेमानुऽआयुंषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥
मानोंवीरान्द्रुद्रभामिनोंवधींर्हविष्मंन्तःसदमित्त्वांहवामहे ॥ ॐ अस्त्रा
य फट् ॥ ६ ॥ ॥ इति लघुषडङ्गन्यासाः ॥ ॥ ७ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीगणेशायनमः ॥ ॥ हरिः॑ॐ ॥ माच्छन्दः॒ प्प्रमाच्छन्दः॒ प्प्रतिमा
च्छन्दो॑ऽअस्स्रीवयुश्छन्दः॒ पुङ्क्तिश्छन्दः॒ऽउष्णिकछन्दो॑बृहतीच्छन्दो॑नुष्टु
प्छन्दो॑व्विराट्छन्दो॑गायत्त्रीच्छन्द॑स्त्रिष्टुप्छन्दोजगतीच्छन्दः॒ ॥ १ ॥
पृथिवीच्छन्दोन्तरिक्षुञ्छन्दोद्यौश्छन्दः॒समाश्छन्दोनक्षत्राणिच्छ
न्दोव्वाकछन्दोमनुश्छन्दः॒ कृषिश्छन्दोहिरण्युञ्छन्दोगौश्छन्दोजाच्छ
न्दोश्श्वश्छन्दः॒ ॥ २ ॥ गुणानान्त्वागुणपतिर्ठहवामहेप्प्रियाणान्त्वा
प्प्रियपतिर्ठहवामहेनिधीनान्त्वांनिधिपतिर्ठहवामहेव्वसोमम ॥ आह
मंजानिगर्भधमात्वमंजासिगर्भधम् ॥ ३ ॥ गायत्त्रीत्रिष्टुब्जगत्यनुष्टु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्पुङ्क्त्यासुह ॥ बृहत्युष्णिहांककुप्सूचीभिःशम्म्यन्तुत्वा ॥ ४ ॥ द्वि अ०
रु. पंदायाश्च्चतुष्पदास्त्रिपंदायाश्चुषट्पंदाः ॥ द्विच्छंन्दायाश्च्चुसच्छंन्दाः १
३. सूचीभिःशम्म्यन्तुत्वा ॥ ५ ॥ सुहस्तोमाःसुहच्छंन्दसऽआवृतःसुह
प्प्रमाऽऋषयःसुप्तदैव्याः ॥ पूर्वैषाम्पन्थांमनुदृश्यधीराऽअन्वालेभि
रेरत्थ्योनरश्मीन् ॥ ६ ॥ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवै
ति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसंङ्कल्पमस्तु ॥ ७ ॥
येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ यदपूर्व्वँय्यु २
क्षमुन्तःप्प्रजानान्तन्मेमनःशिवसंङ्कल्पमस्तु ॥ ८ ॥ यत्प्प्रज्ञानमुत

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्चनक
र्म्मंक्क्रियतेतन्न्मेमनः शिवसङ्कल्प्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्ष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्प्तहोतातन्न्मेम
नः शिवसङ्कल्प्पमस्तु ॥ १० ॥ यस्म्मिन्नृचः सामयजूंषियस्म्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्म्मिँश्चित्तंसर्व्वमोतम्प्रजानान्तन्न्मे
मनः शिवसङ्कल्प्पमस्तु ॥ ११ ॥ सुषारथिरश्श्वानिवयन्न्मनुष्ष्यान्नेनी
यतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्न्मेमनः शिवस
ङ्कल्प्पमस्तु ॥ १२ ॥ इतिसंहितायांरुद्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिꣳसर्वतःस्पृत्वात्यति अ.
४ ष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳसर्वंय्यद्भूतंय्यच्चभाव्यम् ॥ उता २
मृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्या
याँश्चपूरुषः ॥ पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोऽस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व ४
हुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्च॒ये ॥ ६ ॥ तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ऽऋच॒ः सामा॑नि जज्ञिरे ॥ छन्दा॑ᳬंसि
जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ७ ॥ तस्मा॒दश्वा॑ऽअजाय
न्त॒ ये के चो॑भ॒याद॑तः ॥ गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ताऽअ॑जा॒व
य॑ः ॥ ८ ॥ तँय॒ज्ञम्ब॒र्हिषि॒ प्रौक्ष॒न्पुरु॑षञ्जा॒तम॑ग्र॒तः ॥ तेन॑ दे॒वाऽअ॑
यजन्त सा॒ध्याऽऋष॑यश्च॒ ये ॥ ९ ॥ यत्पुरु॑षँ॒ व्यद॑धुः कति॒धा व्य॑कल्पय
न् ॥ मुख॒ङ्किम॑स्यासी॒त्किम्बा॒हू किमू॒रू पादा॑ऽउच्येते ॥ १० ॥ ब्रा॒ह्म॒
णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॑ः कृ॒तः ॥ ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्याᳬं शू॒
द्रोऽअ॑जायत ॥ ११ ॥ च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ऽअजायत ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसी अ.
५ दन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालो २
काँ २॥ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्म्मऽइध्म्मःशरद्धविः ॥ १४ ॥ सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअब
ध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि
प्प्रथमान्न्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वेसाध्ध्याःसन्ति ५
देवाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चव्विश्वकर्म्मणःसमवर्त्तता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्ग्रे ॥ तस्युत्वष्टांविदधंद्रूपमेतितन्मर्त्त्यस्यदेवुत्वमाजानुमग्ग्रे ॥ १७ ॥
वेदाहमेतम्पुरुषम्मुहान्तमादित्यवर्णन्तमसःपुरस्तात् ॥ तमेवविदि
त्वातिमृत्युमेतिनान्यःपन्थाविद्युतेयनाय ॥ १८ ॥ प्प्रजापतिश्चरति
गब्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्युयोनिम्पारिपश्यन्तिधी
रास्तस्मिन्हतस्त्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेब्भ्यऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्वोयोदेवेब्भ्योजातोनमोरुचायब्राह्मये ॥ २० ॥
रुचम्ब्राह्ममजनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु.
८

पा॒र्श्वैन॑क्षत्र॒त्राणि॑रू॒पम॒श्विनौ॒ऽव्यात्त॑म् ॥ इ॒ष्णन्नि॑षाणा॒मु॒म्म॑ऽइषाणस अ.
र्वं॑लो॒कम्म॑ऽइषाण ॥ २२ ॥ ॥ इति॑सर्ठं॒हि॑तायां॑रुद्रपाठे॑द्वि॒ती॒यो॑ऽध्या ३
यः ॥ २ ॥ ॥ध्या॥ आ॒शुः॒शिशा॑नोवृ॒ष॒भोन॒भी॒मो॒घ॒ना॒घ॒नः॒क्षो॒भ॑ण॒श्च॒र्ष॑
णी॒नाम् ॥ स॒ङ्क्रन्द॑नो॒नि॒मि॒ष॒ऽए॒क॒वी॒रः॒श॒त॒र्ठ॒सेना॑ऽअजयत्सा॒क॒मि
न्द्रः॑ ॥ १ ॥ स॒ङ्क्र॒न्द॑नेना॒नि॒मि॒षेण॑जि॒ष्णुना॑यु॒त्का॒रेण॑दु॒श्च्य॒व॒नेन॑धृ॒ष्णु
ना॑ ॥ तदिन्द्रे॑णजयत॒तत्स॑हद्ध्वं॒युधो॑नर॒ऽइषु॑हस्ते॒न॒वृष्णा॑ ॥ २ ॥ सऽ
इषु॑हस्तैः॒सनि॑षङ्गिभिर्व॒शीस॒र्ठ॒स्स्र॑ष्टा॒सयु॑ध॒ऽइन्द्रो॑गु॒णेन॑ ॥ सर्ठ॒सृ॒ष्ट॒जि
त्सो॑म॒पा॒बा॒हु॒श॒र्द्ध्यु॒ग्र॒ध॑न्वा॒प्रति॑हिता॒भि॒रस्ता॑ ॥ ३ ॥ बृह॑स्प्पते॒परि॑दी ६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यारथैनरक्षोहामित्राँ२॥ऽअपबाधमानः ॥ प्प्रभञ्जन्त्सेनाःप्प्रमृणोयु
धाजयन्नस्माकमेद्ध्यविताऽरथानाम् ॥४॥ बलविज्ञायस्त्थविरःप्प्रवी
रःसहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्त्र
मिन्द्ररथमातिष्ठगोवित् ॥५॥ गोत्त्रभिदङ्गोविदँव्वज्ज्रबाहुञ्जयन्तमज्ज्म
प्प्रमृणन्तमोजसा ॥ इमर्ठंसजाताऽअनुवीरयद्ध्वमिन्द्रर्ठंसखायोऽअनु
सर्ठंरभद्ध्वम् ॥ ६ ॥ अभिगोत्त्राणिसहसागाहमानोदयोव्वीरःशतम
न्न्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्ध्योस्म्माकर्ठंसेनाऽअवतुप्प्रयु
त्सु ॥७॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः ॥

२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्र
स्यवृष्णोवरुणस्यराज्ञऽआदित्यानाम्मरुताᳪंशर्द्धऽउग्ग्रम् ॥ महा
मनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥ ९ ॥ उद्ध
र्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाᳪंसि ॥ उद्वृत्रहन्वा
जिनाँव्वाजिनान्युद्रथानाञ्जयताँय्यन्तुघोषाः ॥ १० ॥ अस्म्माकमि
न्द्रःसमृतेषुध्वजेष्वस्म्माकँय्याऽइषवस्ताजयन्तु ॥ अस्म्माकँव्वी
राऽउत्तरेभवन्त्वस्म्माँ२॥ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चि
त्तम्प्प्रतिलोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्सु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शोकैरुन्धेनुामित्त्रुास्तमंसासचन्ताम् ॥ १२ ॥ अवंसृष्टापरापंतुशर
व्येब्रह्मंसर्ठंशिते ॥ गच्छामित्त्रान्प्रपद्यस्वुमामीषाङ्कञ्चुनोच्छिषः
॥ १३ ॥ प्रेताजयंतानरुऽइन्द्रोवुःशर्म्मंयच्छतु ॥ उुग्रावंःसन्तुबाहवो
नाधृष्ष्यायथासंथ ॥ १४ ॥ असौठ्यासेनांमरुतुःपरेषामुब्भ्यैतिनुऽ
ओजंसुास्प्पर्द्धंमाना ॥ ताङ्गूंहतुतमुसापंव्रतेनुयथामीऽअन्न्योऽअन्न्य
न्नजानन् ॥ १५ ॥ यत्रंबाणाःसुम्पतंन्तिकुमाराविंशिखाऽइंव ॥ तन्नुऽ
इन्द्रोबृहुस्पतिुरदिंतिुःशर्म्मंयच्छतुविुश्वाहाशर्म्मंयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मंणाच्छादयामिसोमंस्त्वाराजामृतुनानुंवस्ताम् ॥ उु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रो॒र्व्वरी॑यो॒व्वरु॑णस्ते कृणो॒तु॒ जय॑न्तु॒न्त्वानु॑दे॒वा म॑दन्तु ॥ १७ ॥ ॥ इति
सꣳहितायां॑ रुद्रजाप्ये तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ विभ्राड्बृह
त्पिबतु सो॒म्म्यम्मद्ध्वायु॒र्द्दध॑द्यज्ञप॑ता॒वविह्रुतम् ॥ वात॑जूतो॒योऽअ॒भिर
क्षा॑ति॒त्मना॑प्र॒जाः पु॑पोष पुरु॒धाव्विरा॑जति ॥ १ ॥ उदु॒त्यञ्जा॒तवे॑दसन्दे
वँव्वहन्ति के॒तवः॑ ॥ दृशेव्विश्श्वा॑य॒सूर्य॑म् ॥ २ ॥ येना॑पावक॒चक्ष॑सा भु
र॒ण्यन्तं॒ जनाँ॒२ ॥ऽअनु॑ ॥ त्वँव्वरुण॒पश्य॑सि ॥ ३ ॥ दैव्या॑वद्ध्व॒र्य्यू॒ऽआग
तꣳरथे॑न॒सूर्य्य॑त्वचा ॥ मद्ध्वा॑य॒ज्ञꣳसम॑ञ्जाथे ॥ तम्प्र॒त्नथा॒यँव्वे॒नश्चि
त्रन्दे॒वाना॑म् ॥ ४ ॥ तम्प्र॒त्नथा॑पू॒र्व्वथा॑व्विश्श्वथे॒मथा॑ज्ज्ये॒ष्ठता॑ति॒म्बर्हि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षदंᳬस्वर्व्विदम् ॥ प्प्रतीचीनँव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुव्व
र्द्धसे ॥ ५ ॥ अयँव्वेनश्चोदयत्पृश्निगर्ब्भाज्ज्योतिर्जरायूरजसोव्विमाने ॥
इममपाᳬसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ॥ ६ ॥ चित्र
न्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्यावापृथि
वीऽअन्तरिक्षᳬसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ ७ ॥ आनऽइडा
भिर्व्विदथेसुशस्तिव्विश्वानरः सवितादेवऽएतु ॥ अपियथायुवानोमत्स
थानोव्विश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभि
सूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूर्य्यं ॥ विश्वमाभासिरोचनम् ॥ १० ॥ तत्सूर्य्यस्यदेवत्वन्तन्महि अ.
रु. त्वम्मध्याकर्तोर्व्विततंसञ्जभार ॥ यदेदयुक्तहरितःसधस्थादाद्रात्री ४
९ वासस्तनुतेसिमस्म्मै ॥ ११ ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरू
पङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्न्यद्रुशदस्यपाजःकृष्णमन्न्यद्धरितःस
म्भरन्ति ॥ १२ ॥ बण्णमहाँ २॥ऽअसिसूर्य्यबडादित्यमहाँ २॥ऽअसि ॥
महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ २॥ऽअसि ॥ १३ ॥ बट्सू
र्य्यश्श्रवसामहाँ २॥ऽअसिसत्रादेवमहाँ २॥ऽअसि ॥ महादेवानामसु ९
र्य्यःपुरोहितोविभुज्ज्योतिरदाभ्यम् ॥ १४ ॥ श्रायन्तऽइवसूर्य्यंवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्वोदिन्द्रस्यभक्षत ॥ वसूंनिजातेजनंमानुऽओजंसाप्रातिंभुागन्नदी
धिम ॥ १५ ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरंहसःपिपूतानिरव
द्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥१६॥ आकृष्णेनुरजंसावर्त्तमानोनिवेशयंन्नमृतम्मर्त्यञ्च ॥ हिरण्ययें
नसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥ ॥ इति संहि
तायांरुद्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ५ ॥ ॐ नमस्तेरुद्रम
न्यवंऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्राशि
वातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरि
त्रताङ्कुरुमाहिँसीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसात्वागिरिशाच्छा
वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्मँसुमनाऽअसत् ॥४॥ अद्ध्यवो
चदधिवक्ताप्प्रथमोदैव्योभिषक् ॥ अहीँश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु
धान्न्योधराचीः परासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबब्भ्रुः सुम-
ङ्गलः ॥ येचैनँरुद्राऽअभितोदिक्षुश्श्रिताः सहस्रशोवैषाँहेडऽईमहे
॥६॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्श्रन्न १०
दृश्श्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्ग्रीवायस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हस्राक्षायमीढुषे ॥ अथोयेऽअंस्युसत्त्वांनोहन्तेभ्योंकरन्नमं ॥ ८ ॥
प्रमुञ्चधन्वंनुस्त्वमुभयोरात्त्कन्योंर्ज्यांम् ॥ याश्चंतुहस्तुऽइषवुःपराता
भंगवोवप ॥ ९ ॥ विज्यन्धनुःकपर्दिनोविशंल्योवाणंवाँ २ ॥ ऽउत ।
अनैशन्नस्युयाऽइषवऽआभुरंस्यनिषङ्गधिः ॥ १० ॥ यातैहेतिम्मींढु
ष्टमुहस्तैबभूवंतेधनुः ॥ तयास्मान्विश्वतुस्त्वमयुक्ष्मयापरिभुज ॥
॥ ११ ॥ परितेधन्वंनोहेतिरुस्मान्वृणक्तुविश्वतः ॥ अथोयऽईषु
धिस्तवारेऽअस्मन्निधेहितम् ॥ १२ ॥ अवुतत्त्युधनुष्ट्वठंसहंस्राक्षुशतें
षुधे ॥ निशीर्य्यंशुल्यानाम्मुखांशिवोनंःसुमनाभव ॥ १३ ॥ नमंस्तुऽ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आयुंधायानांततायधृष्णवे ॥ उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवध
न्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमान
ऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्द्री
रिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वे
षुरीरिषः ॥ मानोवीरान्नुद्रभामिनोवधीर्हविष्म्मन्तःसदमित्त्वाहवा
महे ॥१६॥ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेब्भ्यो
हरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्जरायत्त्विषीमतेपथीना
म्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यं ॥ १७ ॥ नमो॑ बब्भ्लु॒शाय॑ व्याधिनेन्ना॑नां॒ पत॑ये॒ नमो॒ नमो॑ भुवस्य॑ हे॒
त्यै॑ जग॑तां॒ पत॑ये॒ नमो॒ नमो॑ रु॒द्राया॑ततु॒ायिने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ नम॑ः सू॒
ताया॑हन्त्यै॒ वना॑नां॒ पत॑ये॒ नमो॒ नमो॒ रोहि॑ताय ॥ १८ ॥ नमो॒ रोहि॑ताय
स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒ नमो॑ भुव॒न्तये॑ वारिवस्कृ॒ताया॒ौष॑धीनां॒ प-
त॑ये॒ नमो॒ नमो॑ मु॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये॒ नमो॒ नम॑ऽ उ॒च्चैर्घो॑षा
याक्रु॒न्दय॑ते प॒त्तीनां॒ पत॑ये॒ नमो॒ नम॑ः कृ॒त्स्नाय ॥ १९ ॥ नम॑ः कृ॒त्स्ना य॒त
युधाव॑ते॒ सत्त्वा॑नां॒ पत॑ये॒ नमो॒ नम॑ः सह॑मानाय नि॒व्याधिन॑ऽ आव्याधि
नीनां॒ पत॑ये॒ नमो॒ नमो॑ नि॒षुङ्गिणे॑ ककु॒भाय॑ स्तेना॒नां॒ पत॑ये॒ नमो॒ नमो॑ नि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. चेरवेपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते ॥ २० ॥ नमोवञ्चते अ.
१२ परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्प ५
तयेनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमो
सिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषि
णेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवो
नमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमऽआयच्छ
द्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योवि
ध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयानेभ्य १२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऽआसीनेभ्यश्चवुोनमुोनमुस्तिष्ठद्भ्योधावद्भ्यश्चवुोनमुोनमः सुभा
भ्यः ॥ २३ ॥ नमः सुभाभ्यः सुभापतिभ्यश्चवुोनमुोनमोऽश्वेभ्यो
ऽश्वपतिभ्यश्चवुोनमुोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवुोन
मुोनमुऽउगणाभ्यस्तृंहतीभ्यश्चवुोनमुोनमोगुणेभ्यः ॥ २४ ॥ नमो
गुणेभ्योगुणपतिभ्यश्चवुोनमुोनमुोव्रातेभ्योव्रातपतिभ्यश्चवुोनमुो
नमुोगृत्सेभ्योगृत्सपतिभ्यश्चवुोनमुोनमुोविरूपेभ्योविश्वरूपे
भ्यश्चवुोनमुोनमुःसेनाभ्यः ॥ २५ ॥ नमुःसेनाभ्यःसेनानिभ्यश्च
वुोनमुोनमोरथिभ्योऽअरथेभ्यश्चवुोनमुोनमःक्षत्तृभ्यःसङ्ग्रहीतृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष
भ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमो
नमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्च
वोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोन
मोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायचशि
तिकण्ठायचनमःकपर्दिने ॥ २८ ॥ नमःकपर्दिनेचव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्वनेच ॥ नमोगिरिशयायचशिपिविष्टाय
चनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमोह्रस्वायचवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुनायँचुनमौ॑बृहुतेचुवर्षी॑यसेचुनमौ॑वृद्धायँचसुवृधे॑चुनमोऽग्र्या॑यचप्प्र
थुमायँचुनमऽआशवे॑ ॥ ३०॥ नमऽआशवे॑चाजिरायँचुनमुः शीग्घ्र्या॑य
चुशीब्भ्या॑यचुनमुऽऊर्म्म्या॑यचावस्वुन्न्या॑यचुनमौ॑नादेयायँचुद्वीप्प्या
यच ॥ ३१ ॥ नमौ॑ज्ज्येष्ठायँचकनिष्ठायँचुनमः पूर्व्वुजायँचापरजायँचु
नमौ॑मध्युमायँचापगुल्ब्भायँचुनमौ॑जघुन्न्या॑यचबुद्धर्या॑यचुनमुः सो
ब्भ्या॑य ॥ ३२ ॥ नमुः सोब्भ्या॑यचप्प्रतिसुर्य्या॑यचुनमुोयाम्म्या॑य
चुक्षेम्म्या॑यचुनमुः श्श्लोक्क्या॑यचावसान्न्या॑यचुनमऽउर्व्वुर्य्या॑यचुख
ल्ल्या॑यचुनमुोव्वन्न्या॑य ॥ ३३ ॥ नमुोव्वन्न्या॑यचुकक्ष्या॑यचुनमः श्श्रुवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. यंचप्प्रतिश्श्रुवायंचुनमंऽआशुषैणायचाशुरंथायचुनमुःशूरांयचावभे अ०
१४ दिनैंचुनमोंबिल्म्मिनैं ॥ ३४ ॥ नमोंबिल्म्मिनैंचकवुचिनेंचुनमों ६
वुर्म्मिणेंचवुरूथिनैंचुनमं÷श्श्रुतायंचश्श्रुतसेनायंचुनमोंदुन्दुब्भ्यायंचा
हनन्न्यायचुनमोंधृषणवैं ॥ ३५ ॥ नमोंधृषणवैंचप्प्रमृशायंचुनमों
निषुङ्गिणेंचेषुधिमतेंचुनमंस्तीक्ष्णेषंवेचायुधिनेंचुनमं÷स्वायुधायंचसु
धन्वंनेच ॥ ३६ ॥ नमुःस्त्रुत्यांयचुपत्थ्यांयचुनमुःकाटच्यांयचुनी
प्यांयचुनमुःकुल्ल्यांयचसरुस्यायचुनमोंनादेयायंचवैशन्तायंचुनमुः
कूप्यांय ॥ ३७ ॥ नमुःकूप्यांयचावुटच्यायचुनमोंवीद्ध्र्यांयचातुप्या १४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यचनमोमेघ्यायचविद्युत्यायचनमोवर्ष्यायचावर्ष्यायचनमोवा
त्याय ॥ ३८ ॥ नमोवात्यायचरेष्म्यायचनमोवास्तव्यायचवास्तुपाय
चनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गवे ॥ ३९ ॥
नमःशङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोऽग्रेवधायचदूरे
वधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारा
य ॥ ४० ॥ नमःशम्भवायचमयोभवायचनमःशङ्करायचमयस्करा
यचनमःशिवायचशिवतरायच ॥ ४१ ॥ नमःपार्यायचावार्यायच
नमःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकूल्यायचनमःश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्प्प्याय च फेन्याय च नमः सिकत्त्याय ॥४२॥ नमः सिकत्त्याय च प्रवा
रु. ह्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च न
१६ मऽइरिण्याय च प्रपथ्याय च नमो व्रज्याय ॥४३॥ नमो व्रज्याय च गो
ष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च
नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय ॥४४॥ नमः शुष्क्याय च
हरित्याय च नमः पाᳬसव्याय च रजस्याय च नमो लोप्याय चोलप्प्या
यच नमऽऊर्व्याय च सूर्व्याय च नमः पर्णाय ॥ ४५ ॥ नमः पर्णाय च प १६
र्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिद

अ.
६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेँचुनमःऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाᳬ
हृदयेभ्योनमोव्विचिन्वत्केभ्योनमोव्विक्षिणत्केभ्योनमःऽआनिर्हते
भ्यः ॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥ आसाम्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्रायत
वसेकपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेवि
श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूःशिवा
व्विश्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परि
नोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. वृङ्क्ष्वस्तनुष्वमीढ्वँस्तोकायुतनंयायमृड ॥ ५० ॥ मीढुंष्टमुशिवंतम अ.
१६ शिवोनंःसुमनाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिँवसानुऽआचंरपि ५
नाकुम्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्रविलोहितनमंस्तेऽअस्तुभगवः ॥
यास्तेंसुहस्रंहेतयोन्यमुस्मान्निवंपन्तुताः ॥ ५२ ॥ सुहस्राणिसहस्र
शोबाह्वोस्तवंहेतयंः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥
असंङ्ख्यातासुहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाँसहस्रयोजनेव
धन्वानितन्मसि ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ १६
तेषांसह० ॥ ५५ ॥ नीलग्रीवाःशितिकण्ठादिवंरुद्राऽउपंश्रिताः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेषां० ॥ ५६ ॥ नीलंग्ग्रीवाः शितिकण्ठाः शर्व्वाऽअधःक्षमाचराः ॥
तेषा० ॥ ५७ ॥ येवृक्षेषुशष्पिञ्जरानीलंग्ग्रीवाविलोहिताः ॥ तेषां०
॥ ५८ ॥ येभूतानामधिपतयोविशिखासःकपर्दिनः ॥ तेषां० ॥ ५९ ॥
येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्युधः ॥ तेषां० ॥ ६० ॥ येतीर्त्थानि
प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषां० ॥ ६१ ॥ येन्नेषुविविद्ध्यन्ति
पात्रेषुपिबतोजनान् ॥ तेषां० ॥ ६२ ॥ यऽएतावन्तश्श्चभूयांꣳसश्श्चदि
शोरुद्द्राव्वितस्त्थिरे ॥ तेषां० ॥ ६३ ॥ नमोस्तुरुद्द्रेब्भ्योयेदिवियेषां
व्वर्षमिषवः ॥ तेब्भ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीची

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्द्दिशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय
श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेब्भ्योयेन्तरिक्षेयेषाँ
व्वातऽइषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीची
र्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रेब्भ्योयेपृथिव्याँ
य्येषामन्नमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशो
दीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोव्वन्तुतेनोमृडयन्तुतेयन्द्वि
ष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इतिसंहितायांरुद्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाठेपञ्चमोऽध्यायः ॥५॥ ॥६॥ ॥ पुनर्नमस्ते इत्यादिषोडश काण्डि
काः पठनीयाः॥ १६॥ एषतैरुद्रभागः सुहस्वस्राम्बिकयातञ्जुषस्वस्वाहै
षतैरुद्रभागऽआषुस्तैपशुः ॥१॥ अवरुद्रमदीमुह्यवदेवन्त्र्यम्बकम्॥ य
थानोवस्यसुस्करद्यथानुःश्रेयसुस्करद्यथानोव्यवसाययात्॥२॥ नम
स्तेरुद्रमुन्न्यवऽउतोतुऽइषवेनमः॥ बाहुभ्यामुततेनमः ॥३॥ यातैरुद्र
शिवातनूरघोरापापकाशिनी॥ तयानस्तुन्वाशन्तमयागिरिशन्ताभि
चाकशीहि।४।नतम्विदाथुयऽइमाजुजानान्यद्युष्म्माकुमन्तरम्बभूव।
नीहारेणप्रावृताजल्प्याचासुतृपऽउक्थुशासश्चरन्ति।५। विश्वकर्म्मा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्यजांनिष्टदेवऽआदिद्बन्धुर्वोऽअंभवद्द्वितीयः ॥ तृतीयः पिताजनितौष
धीनामपाङ्गर्भंव्यदधात्पुरुत्रा ॥ ६ ॥ मीढुष्टमशिवंतमशिवोनः सुम
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिँवसानऽआचरपिनाकम्बिभ्र
दागहि ॥७॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्र
ठ्ँहेतयोन्यमस्मन्निवपन्तुताः ॥ ८ ॥ सहस्राणिसहस्रशोबाह्वोस्तव
हेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ९ ॥ असं
ङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाँसहस्रयोजनेवध
न्वानितन्मसि ॥ १० ॥ वयठ्ँसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वन्तꣳसचेमहि ॥ ११ ॥ एषतेरुद्रभागꣳसहस्वस्रात्रम्बिकयातञ्जुषस्व

स्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ १२ ॥ अवरुद्रमदीमह्यवदेवन्त्र्य

म्बकम्॥यथानोव्वस्यसस्करद्यथानःश्रेयसस्करद्यथानोव्यवसाय

यात् ॥ १३ ॥ भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मे

षायमेष्यै ॥१४॥ त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारु

कमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥१५॥ त्र्यम्बकंयजामहेसुग

न्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥१६॥

एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि।अवततधन्वापिनाकावसःकृत्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वासुऽआहैंऽसन्नः शिवोतींहि ॥ १७ ॥ त्र्यायुषञ्जमदग्नेः कश्यप
रु. १९ स्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥१८॥ शिवोना अ. ६
मासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिंसीः ॥ निवर्त्तयाम्म्या
युषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय ॥१९॥
उग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वांश्चाभियुग्वाचविक्षिपःस्वा
हा ॥२०॥ अग्निंहृदयेनाशनिंहृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभ
वंय्यक्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्ये
नोग्रन्देवंवनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ।२१। उग्रँल्लोहि १९

तेनमित्रऽर्ठसौम्नंत्येनरुद्रन्दौर्व्वत्युनेन्द्रंम्प्रक्रीडेनंमरुतोबलेनसाद्ध्या
न्प्रमुदा॥भुवस्युकण्ठ्यंठ्रुद्रस्यांन्तःपाश्श्र्व्यंम्महादेवस्ययकृच्छुर्व्व
स्यंव्वनिष्ठुःपंशुपतेःपुरीतत्॥२२॥ स्वुस्तिनुऽइन्द्रोंव्वृद्धश्र्रंवाःस्वुस्तिनः
पूषाव्विश्श्ववेदाः॥ स्वुस्तिनुस्ताक्ष्र्योंऽअरिष्टनेमिःस्वुस्तिनोबृहस्पति
र्द्धधातु॥२३॥पयः पृथिव्यांम्पयुऽओषधीषुपयोंदिव्युन्तारिक्षेपयोधाः
॥पयंस्वतीःप्प्रदिशःसन्तुमह्यम्॥ २४ ॥ व्विष्णोंरुराटमासिव्विष्णोः
श्नप्त्रेस्थोव्विष्णोःस्यूरसिव्विष्णोंर्द्ध्रुवोसि ॥ व्वैष्णवमसिव्विष्णवे
त्वा॥२५॥अग्निर्द्देवताव्वातोदेवतासूर्य्योंदेवताचन्द्रमादेवताव्वसवोदेव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. तांरुद्रादेवतांदित्यादेवतांमरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवते अ०

२० न्द्रोदेवतावरुणोदेवता॥२६॥ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशा ७

न्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशा

न्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥

॥२७॥ इतिसꣳहितायांरुद्रपाठेषष्ठोऽध्यायः ॥ ६ ॥ ७ ॥ वाजश्चमेप्रस

वश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्च

मेश्रवश्चमेश्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥ २०

प्राणश्चमेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेवाक्चमे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनंश्चमेचक्षुंश्चमेश्श्रोत्रंञ्चमेदक्षंश्चमेबलंञ्चमेयज्ञेनकल्पन्ताम् ॥२॥
ओजश्चमेसहंश्चमऽआत्त्माचंमेतनूंश्चमेशर्म्मंचमेवर्म्मंचमेङ्गानिच
मेस्थीनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजराचंमेयज्ञेनक
ल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यंञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमे
मंश्चमेम्भंश्चमेजेमाचंमेमहिमाचंमेवरिमाचंमेप्प्रथिमाचंमेवर्षिमा
चंमेद्राघिमाचंमे वृद्धञ्चमेवृद्धिश्चमेयज्ञेनंकल्पन्ताम् ॥ ४ ॥ सत्त्य
ञ्च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ सत्त्य
ञ्चमेश्श्रद्धाचंमेजगच्चमेधनंञ्चमेविश्वंञ्चमेमहश्चमेक्क्रीडाचंमेमोदंश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. मेजातश्चंमेजनिष्ष्यमांणश्चमेसूक्तश्चंमेसुकृतश्चंमेयुज्ञेनंकल्प्पन्ताम्॥ अ.
२१ ॥ ५ ॥ ऋुतश्चंमेमृतंश्चमेयुक्ष्मश्चमेनांमयच्चमेजीवातुंश्चमेदीर्घायु ७
त्वश्चंमेनमित्रंश्चमेभंयश्चमेसुखश्चंमेशयंनश्चमेसूषाश्चंमेसुदिनंश्चमेयु
ज्ञेनंकल्प्पन्ताम् ॥ ६ ॥ युन्ताचंमेधुर्त्ताचंमेक्षेमंश्चमेधृतिश्चमेविश्वंश्च
मेमहंश्चमेसुम्विच्चंमेज्ञात्रंश्चमेसूश्चंमेप्प्रसूश्चंमेसीरंश्चमेलयंश्चमेयुज्ञे
नंकल्प्पन्ताम्॥७॥शश्चंमेमयंश्चमेप्प्रियश्चंमेनुकामश्चंमेकामंश्चमेसौ
मनुसश्चंमेभगंश्चमेद्रविंणश्चमेभुद्रश्चंमेश्श्रेयंश्चमेव्वसीयश्चमेयशंश्चमे २१
युज्ञेनंकल्प्पन्ताम्॥८॥ऊर्क्कचं॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काध्यायः पठनीयः ॥ ऊर्क्कञ्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधु
चमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमे
यज्ञेनकल्पन्ताम् ॥९॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्र
भुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनक
ल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमे
सुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुम
तिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिला
श्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. वारांश्चमेगोधूमांश्चमेमसूरांश्चमेयज्ञेनकल्पन्ताम् ॥ १२ ॥ अश्मा अ.
२२ च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः ॥ अश्मा ७
चमेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्पतयश्चमेहिर
ण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम्
॥ १३ ॥ अग्निश्चमऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्या
श्चमेकृष्टपच्याश्चमेग्राम्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्ति
श्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥ वसुचमेवसतिश्च २२
मेकर्मचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञेनक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ल्पन्ताम् ॥१५॥ अग्निश्चंमुऽइन्द्रश्चं ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ अग्निश्चंमुऽइन्द्रंश्चमेसोमंश्चमुऽइन्द्रंश्च
मेसवितार्चमुऽइन्द्रंश्चमुसरंस्वतीचमुऽइन्द्रंश्चमेपूषाचंमुऽइन्द्रंश्चमुबृ
हुस्पतिश्चमुऽइन्द्रश्चमेयुज्ञेनंकल्पन्ताम् ॥१६॥ मित्रश्चंमुऽइन्द्रंश्चमुव
रुणश्चमुऽइन्द्रंश्चमेधाताचंमुऽइन्द्रंश्चमुत्त्वष्टाचमुऽइन्द्रंश्चमेमुरुतंश्च
मुऽइन्द्रश्चमुविश्वेचमेदुवाऽइन्द्रंश्चमेयुज्ञेनंकल्पन्ताम् ॥१७॥ पृथिवी
चंमुऽइन्द्रंश्चमुन्तरिक्षश्चमुऽइन्द्रंश्चमेद्यौश्चंमुऽइन्द्रंश्चमुसामांश्चमुऽइ
न्द्रंश्चमुनक्षंत्राणिचमुऽइन्द्रंश्चमुदिशंश्चमुऽइन्द्रंश्चमेयुज्ञेनंकल्पन्ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मृ॥१८॥अꣳशुश्च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठ
नीयः। अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मऽउपाꣳशुश्च मेऽन्त
र्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्था
नश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १९ ॥ आग्रयणश्च मे वै
श्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरु
त्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च
मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥ स्रुचश्च मे चमसाश्च मे वायु
व्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च मऽआध

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृनीयंश्च मेघेदिंश्च मेबर्हिश्च मेवभृथश्च मेस्वगाकारश्च मेयज्ञेनंकल्प
न्ताम् ॥ २१ ॥ अग्निश्च मेघर्म्मश्च ॥ 'नमस्ते' इत्यादि ६६ म
न्त्रात्मको नमकाध्यायः पठनीयः॥अग्निश्च मेघर्म्मश्च मेर्कश्च मेसूर्य्य
श्च मेप्प्राणश्च मेश्वमेधश्च मेपृथिवीचमेदितिश्च मेदितिश्च मेद्यौश्च मेऽङ्गु
लंयःशक्करयोदिशश्च मेयज्ञेनंकल्पन्ताम् ॥ २२ ॥ व्रतञ्चमऽऋ
तवश्च मेतपश्च मेसम्वत्सरश्च मेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेचमेयज्ञेनं
कल्पन्ताम् ॥ २३ ॥ एकाच ॥ 'नमस्ते'इत्यादि ६६ मन्त्रा
त्मको नमकाध्यायः पठनीयः ॥ एकाचमेतिस्रश्च मेतिस्रश्च मेपञ्चच

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मेपञ्चचमेसप्तचमेसप्तचमेनवचमेनवचमऽएकादशचमऽएकादश
चमेत्रयोदशचमेत्रयोदशचमेपञ्चदशचमेपञ्चदशचमेसप्तदशचमेस
प्तदशचमेनवदशचमेनवदशचमऽएकविꣳशतिश्चमऽएकविꣳशति
५६ श्चमेत्रयोविꣳशतिश्चमेत्रयोविꣳशतिश्चमेपञ्चविꣳशतिश्चमेपञ्चविꣳ
शतिश्चमेसप्तविꣳशतिश्चमेसप्तविꣳशतिश्चमेनवविꣳशतिश्चमेनव
विꣳशतिश्चमऽएकत्रिꣳशच्चमऽएकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेयज्ञेन
कल्पन्ताम् ॥ २४ ॥ चतस्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ चतस्रश्चमेष्टौचमेष्टौचमेद्वादशचमेद्वा २४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दंशश्चमेषोडंशश्चमेषोडंशश्चमेव्विᳬंशतिश्चंमेव्विᳬंशतिश्चंमेचतुर्व्विᳬंश
तिश्चमेचतुर्व्विᳬंशतिश्चमेष्टाविᳬंशतिश्चमेष्टाविᳬंशतिश्चमेद्वात्रिᳬंश
च्चमेद्वात्रिᳬंशच्चमेषट्त्रिᳬंशच्चमेषट्त्रिᳬंशच्चमेचत्त्वारिᳬंशच्चंमेचत्त्वा
रिᳬंशच्चंमेचतुश्चत्त्वारिᳬंशच्चमेचतुश्चत्त्वारिᳬंशच्चमेष्टाचंत्वारिᳬंश
च्चमेयुज्ञेनंकल्पन्ताम् ॥ २५ ॥ त्र्यविश्च ॥ 'नमस्ते' इत्यादि ६६म
न्त्रात्मको नमकाध्यायः पठनीयः॥ त्र्यविश्चमेत्र्युवीचंमेदित्यवाट्चंमे
दित्यौहीचंमेपञ्चाविश्चंमेपञ्चावीचंमेत्रिवत्सश्चंमेत्रिवत्साचंमेतुर्य्यु
वाट्चंमेतुर्य्यौहीचंमेयुज्ञेनंकल्पन्ताम् ॥ २६ ॥ पृष्ठवाट्चंमेपष्ठौ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. ह्रीचंमऽउक्षाचंमेव्वशाचंमऽऋषभश्चंमेव्वेहच्चंमेनुड्वाँश्चंमेधेनुश्चंमेयज्ञेनं
२५ कल्पन्ताम् ॥ २७ ॥ व्वाजायुस्वाहां ॥ अत्र "गणानान्त्वा" इत्यत अ.
आरभ्य नमकाध्यायान्तमध्यायपञ्चकं पठनीयम् ॥ व्वाजायुस्वाहांप्प्रस ७
वायुस्वाहांपिजायुस्वाहाक्क्रतवुस्वाहाव्वसवुस्वाहांहर्प्पतयुस्वाहाह्नेमु
ग्धायुस्वाहांमुग्धायंव्वैनंशिनायुस्वाहाव्विनंशिनंऽआन्त्यायनायु
स्वाहान्त्यायंभौवनायुस्वाहाभुवनस्युपतयुस्वाहाधिपतयुस्वाहांप्प्र
जापतयुस्वाहां ॥ इयन्तेराण्मित्रायंयुन्तासियमंनऽऊर्जेत्वावृष्ट्यैत्वा
प्प्रजानान्त्वाधिपत्याय ॥ २८ ॥ आयुर्यज्ञेनंकल्पतांप्प्राणोयज्ञेनं २५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कल्पताञ्चक्षुर्यज्ञेनकल्पताᳪंश्रोत्त्रँय्यज्ञेनकल्पताम्वाग्ग्यज्ञेनक
ल्पताम्मनोयज्ञेनकल्पतामात्त्मायज्ञेनकल्पताम्ब्रह्मायज्ञेनक
ल्पताञ्ज्योतिर्य्यज्ञेनकल्पताᳪंस्वर्य्यज्ञेनकल्पताम्पृष्ठँय्यज्ञेनक
ल्पताँय्यज्ञोयज्ञेनकल्पताम्॥स्तोमश्चयजुश्चऽऋक्क्चसामचबृहच्चर
थन्तरञ्च ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमवेट्
स्वाहा॥२९॥ इतिसᳪंहितायांरुद्रपाठेसप्त० ॥७॥ ऋचंव्वाचम्प्रपद्ये
मनोयजुःप्प्रपद्येसामप्प्राणम्प्रपद्येचक्षुःश्श्रोत्त्रम्प्रपद्येव्वागोजःसहौ
जोमयिप्प्राणापानौ ॥ १ ॥ यन्मेच्छिद्द्रञ्चक्षुषोहृदयस्यमनसोव्वाति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रु. तृण्णुम्बृहुस्स्पार्तिम्मुंतद्दंधातु ॥शन्नोंभवतुभुवंनस्स्युषस्स्पार्तिं÷॥२॥भूर्भु अ०

२६ वुःस्स्व÷तत्संवितुर्व्वरेंण्ण्युम्भग्गोंदुेवस्स्यंधीमाहिधियुोयोनं÷प्प्रचुोदयांत् ८

॥३॥ कयांनश्चित्रऽआभुंवदूतीसुदावृंधुःसखां॥कयुाशर्चिष्ठयावृता ॥४॥

कस्त्वांसुत्योमदांनुाम्मंठहिंष्ठोमत्सुदन्धंसः॥दृढाचिंदुारुजेव्वसुं॥५॥

अुभीषुणुःसखींनामवितार्जरितॄणाम् ॥ शुतम्भंवास्यूतिर्भि÷ ॥६॥

कयुात्त्वन्नंऽऊुत्त्याभिप्प्रमंन्दसेवृृषन् ॥ कयांस्तुोतृभ्भ्युऽआभंर ॥७॥

इन्द्रोव्विश्श्वंस्यराजति ॥ शन्नोंऽअस्तुद्विपदेुशश्चतुंष्प्पदे ॥ ८ ॥ शन्नों

मित्त्रःशव्वरुणुंःशन्नोंभवत्त्वर्य्युमा ॥ शन्नुऽइन्द्रोबृहुस्पातिुःशन्नु. व्विष्णुं २६

रुरुक्क्रमः ॥ ९ ॥ शन्नोवातःपवताᳬंशन्नस्तपतुसूर्य्यः ॥ शन्नःकनि
क्रदद्देवःपर्ज्जन्योऽअभिवर्षतु ॥ १० ॥ अहानिशम्भवन्तुनःशᳬंरात्रीःप्र
तिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रावरुणारातह
व्या ॥ शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुवितायशंय्योः ॥ ११ ॥
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥ १२ ॥
स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ १३ ॥
आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥
योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तस्म्माऽअरंङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ १६ ॥ अ.
रु. द्यौःशान्तिरन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापःशान्तिरोषधयःशा ८
२७ न्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशा
न्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्य
माचक्षुषासर्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्वाणिभू
तानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे ॥ १८ ॥ दृतेदृꣳहमाज्ज्यो
क्केंसन्दृशिजीव्यासञ्ज्योक्केंसन्दृशिजीव्यासम् ॥ १९ ॥ नमस्तेहर २७
सेशोचिषेनमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयःपाव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कोऽअस्म्मब्भ्यंठंशिवोभव ॥२०॥ नमस्तेऽअस्तुविद्युतेनमस्तेस्तन
यित्त्नवे॥नमस्तेभगवन्नस्तुयतःस्वःसमीहसे ॥२१॥ यतोयतःसमीह
सेततोनोऽअभयङ्कुरु ॥शन्नःकुरुप्प्रजाब्भ्योभयन्नःपशुब्भ्यः॥ २२॥
सुमित्त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मा
न्द्वेष्टियञ्चवयन्द्विष्म्मः ॥२३॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्॥
पश्येमशरदःशतञ्जीवेमशरदःशतठंशृणुयामशरदःशतम्प्रब्रवामश
रदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात् ॥ २४ ॥
इतिसठंहितायांरुद्रपाठेऽष्टमोऽध्यायः॥८॥ ॥ॐ नमः शिवाय॥

॥ इति श्रीजयपुरनिवासिपंडितश्रीमाधवप्रसादकृतसुव्यवस्थाशोधना रुद्री समाप्ता ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ श्रीगणेशायनमः ॥ ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-वि
लोलवीचिवल्लरीविराजमानमूर्धनि ॥ धगद्धगद्धगज्ज्वलल्ललाटपट्टपा
वके किशोरचंद्रशेखरेरतिःप्रतिक्षणंमम ॥ १ ॥ धराधरेंद्रनंदिनीवि
लासबंधुबंधुर-स्फुरद्दिगंतसंततिप्रमोदमानमानसे ॥ कृपाकटाक्षधो
रणीनिरुद्धदुर्धरापदि क्वचिच्चिदंबरेमनोविनोदमेतुवस्तुनि ॥ २ ॥ ज
टाभुजंगपिंगलस्फुरत्फणामणिप्रभा-कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमु
खे ॥ मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनोविनोदमद्भुतंबिभर्तुभूत
भर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखर-प्रसूनधूलिधोरणीवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धूसरांघ्रिपीठभूः ॥ भुजंगराजमालयानिबद्धजाटजुटकः श्रियेचिराय
जायँतांचकोरबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वलद्धनंजयस्फुलिंग
भा-निपीतपंचसायकंनमन्निलिंगनायकम् ॥ सुधामयूखलेखयाविरा
जमानशेखरं महःकपालिसंपदेशिरोजटालमस्तुनः ॥ ५ ॥ करालभाल
पट्टिकाधगद्धगद्धगज्ज्वल-द्धनंजयाधरीकृतप्रचंडपंचसायके ॥ धराध
रेंद्रनंदिनीकुचाग्रचित्रपत्रक-प्रकल्पनैकशिल्पिनित्रिलोचनेमतिर्मम
॥ ६ ॥ नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्-कुहूनिशीथिनीतमःप्रबंध
बंधुकंधरः ॥ निलिम्पनिर्झरीधरस्तनोतुकृत्तिसिंधुरः कलानिधानबं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धुरः श्रियं जगद्धुरंधरः ॥ ७ ॥ प्रफुल्लनीलपंकजप्रपंचकालिमच्छटा-वि
डंबिकंठकंधरारुचिप्रबंधकंधरम् ॥ स्मरच्छिदं पुरच्छिदं भवच्छिदं म
खच्छिदं गजच्छिदांधकच्छिदं तमंतकच्छिदं भजे ॥ ८ ॥ अगर्वसर्व
मंगलाकलाकदम्बमंजरी-रसप्रवाहमाधुरीविजृंभणामधुव्रतम् ॥ स्म
रांतकं पुरांतकं भवांतकं मखांतकं गजांतकांधकांतकं तमंतकांतकं भजे
॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्-धगद्धगद्विनिर्गमत्कराल
भालहव्यवाट् ॥ धिमिद्धिमिद्धिमिद्ध्वनन्मृदंगतुंगमंगल-ध्वनिक्रमप्रव
र्तितप्रचण्डताण्डवः शिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्रजोर्वरीष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ॥ तृणारविंदचक्षुषोः प्र
जामहीमहेन्द्रयोः समंप्रवर्तयन्मनः कदासदाशिवंभजे ॥ ११ ॥ कदा
निलिंपनिर्झरीनिकुंजकोटरेवसन् विमुक्तदुर्मतिःसदाशिरःस्थमंज
लिंवहन् ॥ विमुक्तलोललोचनोललामभाललग्नकः शिवेतिमंत्रमुच्चर
न्कदासुखीभवाम्यहम् ॥ १२ ॥ इदंहिनित्यमेवमुक्तमुत्तमोत्तमंस्त
वं पठन्स्मरन्ब्रुवन्नरोविशुद्धिमोतिसंततम् ॥ हरेगुरौसुभक्तिमाशुया
तिनाऽन्यथागतिं विमोहनंहिदेहिनांसुशंकरस्यचिंतनम् ॥ १३ ॥
पूजाऽवसानसमयेदशवक्रगीतं यःशंभुपूजनमिदंपठतिप्रदोषे ॥ त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यास्थिरांरथगजेंद्रतुरंगयुक्तां लक्ष्मींसदैवसुमुखींप्रददातिशंभुः १४॥

इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥ ॥ ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाःशरीरं गृहं पूजा ते विषयो
पभोगरचना निद्रा समाधिस्थितिः॥ संचारः पदयोःप्रदक्षिणविधिः
स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलंशंभोतवाराधनम् १

इदं पुस्तकं मुम्बय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये
मुद्रयित्वा प्रकाशितम्।

आश्विने संवत् २०१८ शके १८८३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुद्रक और प्रकाशक—
खेमराज श्रीकृष्णदास,
अध्यक्ष—“ श्रीवेंकटेश्वर ” स्टीम्-प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार “श्रीवेंकटेश्वर” मुद्रणयन्त्रालयाध्यक्षाधीन है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

समाप्ता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri